श्रीगणेशाय नमः॥ भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते॥ प्राप्ते सन्निहिते मरणे नहि नहि
रक्षति डुकृञ् करणे॥ बालस्तावत् क्रीडाशक्तः तरुणस्तावत्तरुणीरक्तः॥ वृद्धस्तावच्चिन्ता
मग्नः परमे ब्रह्मणि कोपि न लग्नः॥१॥ अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डं वृ
द्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् भज गो० २॥ दिनमपि रजनी सायं प्रात
शिशिरवसन्तः पुनरायातः कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः॥३॥ १॥
भज गो० कथ्याकर्पटविरचितकन्था पुण्यापुण्यविवर्जितपन्थाः न त्वं नाहं नायं लोकस्त
दपि किमर्थं क्रियते शोकः॥४॥ भज गो० नारीस्तनभरजघननिवेशं दृष्ट्वा मायामोहा
वेशं एतन्मांसवसादिविकारं मनसि विचारय वारंवारम्॥५॥ भज गो० अग्रे वह्निः पृष्ठे
भानू रात्रौ चिबुकसमर्पितजानुः करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः॥६॥

भजगो०॥ कोऽहं कस्त्वं कुत आयातः का मे जननी को मे तातः इति परिभावित सर्वमसारं सर्वं
त्यक्त्वा स्वप्नविचारम्॥२३॥ भजगो० इति श्रीमच्छंकराचार्यविरचितं गोविन्दस्तोत्रम् स
माः सं[illegible] शुभमस्तु शुभं भूयात्

...वयसिगतेकः कामविकारः शुष्केनीरेकः कासारः क्षीणेवित्तेकः परिवारो ज्ञाततत्त्वेकः
संसारः ॥७॥ भजगो० यावद्वित्तोपार्जनशक्तः पश्चाज्जीवतिजर्जरदेहे वार्तांकोपिनपृच्छति
गेहे ॥८॥ भजगो० जटिलोमुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ॥९॥ भजगो०
गेयंगीतानामसहस्रं ध्येयंश्रीपतिरूपमजस्रम् नेयंसज्जनसंगतिचित्तम् । देयंदीन
जनायचवित्तम् ॥१०॥ भजगो० गङ्गाजललवकणिकापीता किंचिद्भगवद्गीताधीता ।
येनाकारिमुरारेरर्चा तस्ययमोपिनकुरुतेचर्चाम् ॥११॥ भजगो० पुनरपिजननंपुनरपि
मरणंपुनरपिजननीजठरेशयनम् इहसंसारेबहुदुस्तारे कृपयापारे पाहिमुरारे ॥१२॥